# विष्णुपुराणीया अद्वैतदर्शनमीमांसा

डा. ए. आर्. अनिल्कुमार्,

पुराणानां विभागकलनप्रसङ्गे विष्णुपुराणस्य सात्विकपुराणेषु अन्तर्भूतत्वं वदति।[1] दृश्यमानपारिभाषिकशब्दानाम् आधारेण ज्ञातुं प्रभवामो यत् निर्विषयमोक्षदर्शनपथि सञ्चरद्दर्शनग्रथितं विशिष्य अद्वैतदर्शनसिद्धान्तसमरसतां समावहत् भवति विष्णुपुराणम् इति। परस्य ब्रह्मणः

श्रीशङ्करभगवत्पादैः संस्थापिताद्वैतदर्शनस्य मौलिकं रूपं विष्णुपुराणे दृश्यते इत्येतत् यद्यपि वक्तुं शक्यते तथापि भगवत्पादकृतिषु न कुत्रचित् अद्वैतसिद्धान्तप्रोद्भासकश्लोकतल्लजाः दृश्यन्ते।

श्रीशङ्करभगवत्पादपश्चात्कालीनाभ्यां श्रीमन्मध्वरामानुजाभ्यां प्रमाणत्वेन विष्णुपुराणीयश्लोकाः समुद्धृता इत्येतत् श्रीभाष्याद्यवलोकनेन ज्ञायते।

वैकुण्ठवासिनः विष्णोः परमपुरुषत्वमुद्घोषयती द्वैतविशिष्टाद्वैतदर्शने। किन्तु अद्वैतदर्शने विष्णोः तादृग्रीत्या सत्वं चिन्तयितुं न शक्यते इत्यतः 'मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः' इति मधुसूदनसरस्वतीवचनानुरोधेन विकल्परहितस्य विष्णोः व्यापनशीलत्वं सङ्कलय्य, बृहत्वं बृंहणत्वं च समावेश्य सिद्धान्तरचना क्रियते चेत् द्वैतविशिष्टाद्वैतदर्शनोपरि अद्वैतदर्शनस्य मीमांसा एव विष्णुपुराणे भूरि द्रष्टुं शक्या इत्यत्र नास्ति विमतिः।

'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म'[2] इति ब्रह्मणः तटस्थलक्षणं यदुक्तं तत्-

'विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम्।
स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः।।'[3] इत्यनेन परामृष्टम्। तद्वत्-
'तद्ब्रह्म नित्यमजमक्षयमव्ययम्।
एकस्वरूपं तु सदा हेयाभावाच्च निर्मलम्।।'[4] इति परब्रह्मणः स्वरूपलक्षणपरः एकत्वनिर्धारणपरश्च परामर्शः अद्वैतमतावलम्बी दृश्यते।

'द्वे रूपे ब्रह्मणस्तस्य मूर्तं चामूर्तमेव च।
क्षराक्षररूपे ते सर्वभूतेष्ववस्थिते।।
अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत्।

शान्तिस्तथेदमखिलं जगत्।।'[५] इति परब्रह्मणः जगतश्च पृथक्त्वं क्षराक्षररूपेण उच्यते यद्यपि तथापि-

'ज्ञानस्वरूपमखिलं जगत्'[६] इति परामर्शेन यत्प्रतीयमानं तत्सर्वं ज्ञानमेवेति ज्ञायते। ब्रह्मणः पृथक् जगत् प्रतीयते चेत् तस्य कारणम् अज्ञानमिति-

'—————— अबुद्धयः।

अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसम्प्लवे।।'[७] इत्यनेन प्रतिपादितम्।

अज्ञानेन मायया जगत् प्रतीयते इति जगतः कारणरूपेण माया निर्दिष्टा अद्वैतदर्शने। किन्तु माया इति शब्दतः निर्देशः नास्ति विष्णुपुराणे। माया भ्रान्तिः इति शब्देन निर्दिष्टा।

भ्रमः वर्तते चेत् संसारः इत्येतत् भ्राम्यन्ते मोहसम्प्लवे इत्यनेन प्रतिपादितम्।

परब्रह्मणः परमस्थानत्वं निर्वक्ति, ब्रह्मविष्णुमहेश्वराः परब्रह्मणः शक्तयः, तदेव विष्णोः परमं पदम्[८] इति परामृष्टम्-

'शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवात्मिकाः।

भवन्त्यभूतपूर्वस्य तद्विष्णोः परमं पदम्।।'[९] इति।

विष्णुरेव परब्रह्मपदाभिधेय इति विवरणप्रसङ्गे ओङ्कारः ब्रह्म इत्येतच्च निर्दिष्टम्-

'ध्रुवमेकाक्षरं ब्रह्म ओमित्येवं व्यवस्थितम्।

बृहत्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते।।'[१०]

भ्रान्तिः पृथक्त्वे नानात्वे च कारणम्-

'सितनीलादिभेदेन यथैकं दृश्यते नभः।

भ्रान्तिदृष्टिभिरात्मापि तथैकः सन् पृथक्पृथक्।।

एकः समस्तं यदिहास्ति किञ्चित्तदुच्यते नास्ति परं ततोऽन्यत्।

सोऽहं स च त्वं सर्वमेतदात्मस्वरूपं त्यज मोहभेदम्।।'[११]

एकं भवति तद्ब्रह्म-

'एकमेकमिदं विद्धि न भेदि सकलं जगत्।'[१२]

जीवस्य ब्रह्माभिन्नत्वं निर्वक्ति-

'समस्तदेहेषु व्याप्तैकः पुमान्'[१३]

'एको व्याप समः शुद्धो निर्गुणः प्रकृतेः परः।

जन्मवृद्ध्यादिरहितः आत्मा सर्वगतोऽव्ययः।।'[१४] इत्यादिषु।

मोक्षनिर्धारणं तु-

विष्णोः परब्रह्मणः ध्यानात्, भक्त्याः सहयोगाच्च जनिमृतिरूपसंसारसन्तरणाय यत्नः कर्तव्यः-

'मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी।

स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते।।' इति विवेकचूडामण्युक्त्यनुसारं मोक्षसाधनेषु भक्त्याः परमसाधनत्वं दृश्यते। विद्याविद्यां निहन्त्येव इति विद्यायाः अविद्यानिवारकत्वम् आत्मबोधे च निर्दिष्टम्। उभयमपि विष्णुपुराणे साधनत्वेन प्रतिपादितम्।

विष्णुपुराणे अद्वैतदर्शनस्य मीमांसा एव दरीदृश्यते। श्रीशङ्करः स्वकृतिषु विष्णुपुराणीयाः केऽपि श्लोकाः नोद्धृताः किन्तु अद्वैतदर्शनस्य पारिभाषिकशब्दानां प्रयोगः बहु दृश्यते इत्यतः द्वैतविशिष्टाद्वैतदर्शनोपरि अद्वैतदर्शनस्य समग्रप्रपञ्चनम् एव अस्ति इति भाति। निर्गुणसगुणभेदेन क्षराक्षरभेदेन ब्रह्मणः पार्थक्यं द्वैविध्यं च प्रासङ्गिकरूपेण प्रतिपादयति सति विष्णुपुराणे 'एकं सद्विप्रा बहुधा वदन्ति' इति वेदवचनम् अनुस्मरच्चिन्तनमेव कृतमित्यत्र नास्ति सन्देहलेशावकाशः।

**पादटिप्पणी**

१. डा. बृजेश कुमार शुक्ला, पुराणसाहित्यादर्शः, पृ. ८२, डा. हेमवती शर्मा, नारदपुराण का सांस्कृतिक अध्ययन, पृ. ३०-सत्त्वं यत्तत् त्रिकालाबाध्यं ब्रह्म, तद्विषयीकृत्य प्रवर्तमानम् इत्यतः सात्त्विकम् अन्वर्थम्। अध्यात्मदर्शनापरपर्यायत्वेन सात्त्विकपुराणानि भासन्ते।

२. तै. उ. ३।१.

३. वि. पु. १।१।३१.

४. तत्रैव, पु. १।२।१४.

५. तत्रैव, पु. १।२२।५६-५७.

६. तत्रैव, १।४।४०.

७. तत्रैव, १।४।४०.

८. तत्रैव, १।९।१६.

९. तत्रैव, १।९।१६.

१०. तत्रैव, ३।३।२२.

११. तत्रैव, २।१६।२२-२३.

१२. तत्रैव, २।१५।३६.

१३. तत्रैव, २।१३।९१.

१४. तत्रैव, २।१४।२९.

**परामृष्टग्रन्थाः**

१. डा. बृजेश कुमार शुक्लः, पुराणसाहित्यादर्शः, न्यू भारतीय बुक् कार्पोरेषन्, दिल्ली, १९८७.
२. गिरिधर शर्मा चर्तुर्वेदी, पुराणविद्या, राजस्थान संस्कृत अकादमी, जयपुरम्, १९९७.
३. हेमवती शर्मा, नारद पुराण का सांस्कृतिक अध्ययन, परिमल पब्लिकेषन्स्, दिल्ली, १९९९.
४. विष्णुमहापुराणम्, नाग पब्लिशर्स्, दिल्ली, २००४.

---